तथा भोक्तृत्वं रूपादिषु युगपदेव स्यान्न क्रमेणेति चेत् नैवम् न हि चेतनैकत्वं प्रत्यभिज्ञाक्रमभोगयोर्निमित्तं किन्त्वेकशरीराश्रयत्वमेव। ततो यथैकस्मिन् गृहे बहूनां पुरुषाणामेकैकस्य विवाहेऽन्येषामुपसर्ज्जनत्वं तथेन्द्रियात्मनामपि एकैकस्योपभोगकालेऽन्येषामुपसर्ज्जनत्वम्। अन्ये तु मन्यन्ते स्वप्ने चक्षुराद्यभावेऽपि केवले मनसि विज्ञानाश्रयत्वमहंप्रत्ययालम्बनत्वं चोपपद्यते। न च रूपादिविज्ञानानां चक्षुराद्याश्रयत्वं, तथासति केवले मनसि रूपादिस्मृत्यनुपपत्तेः। ततः करणान्येव चक्षुरादीनि अहंप्रत्ययस्तु तत्र कर्त्तृत्वोपचारात् सिद्ध्यति। न चानेकात्मस्वेकशरीराश्रयत्वमात्रेण प्रत्यभिज्ञा युज्यते एकप्रासादमाश्रितानामपि तत्प्रसङ्गात्। तस्माच्चक्षुरादिकरणकं शरीराद्याधारं मनएवात्मेति। विज्ञानवादिनस्तु क्षणिकविज्ञानव्यतिरिक्तवस्तुनः सद्भावमनुभवविरुद्धम् मन्वानास्तस्यैव विज्ञानस्यात्मत्वमाहुः। प्रत्यभिज्ञानं तु ज्वालायामिव सन्ततविज्ञानोदयसादृश्यादुपपद्यते विज्ञानानां हेतुफलसन्तानमात्रादेव कर्म्मज्ञानबन्धमोक्षादिसिद्धिः। माध्यमिकास्तु सुषुप्तौ विज्ञानस्याप्यदर्शनाच्छून्यमेवात्मतत्त्वमित्याहुः यदि सुषुप्तौ विज्ञानप्रवाहः स्यात्तदा विषयावभासोऽपि प्रसज्येत। निरालम्बनज्ञानायोगात् जाग्रत्स्वप्नज्ञानानामेव सालम्बनत्वं न सौषुप्तिकज्ञानानामिति चेत् न विशेषाभावात् विमतं सालम्बनम् प्रत्ययत्वात् संमतवदिति। उत्थितस्य सौषुप्तविषयस्मृत्यभावनियमान्न तत्र विषय इति चेत्। तर्हि तत्र नियमेनास्मर्य्यमाणत्वादेव ज्ञानमपि मा भूत्। न च शून्ये विवदितव्यं यथा सविकल्पकः स्वविषयविपरीतनिर्विकल्पकजन्यस्तथा सत्प्रत्ययोऽपि स्वविपरीतशून्यजन्य इत्यभ्युपेयत्वात् एवं चोत्थाने सति जायमानस्याहमस्मीति सत्प्रत्ययस्य समनन्तरपूर्वप्रत्ययलक्षणकारणरहितस्य वास्तवत्वायोगाच्छून्यमेव तत्त्वमिति। अपरे पुनः शरीरेन्द्रियमनोविज्ञानशून्यव्यतिरिक्तं स्थायिनं संसारिणं कर्त्तारं भोक्तारमात्मानमाहुः। न च शून्येऽहंप्रत्यय उपपद्यते वन्ध्यापुत्रादावपि तत्प्रसङ्गात्। नापि क्षणिकविज्ञाने क्रमभावी व्यवहारो युज्यते सर्व्वो हि लोकोऽनुकूलं वस्तु प्रथमतो जानाति ततः इच्छति ततः प्रयतते ततस्तत् प्राप्नोति ततः सुखं लभते। यद्येतादृशमेककर्त्तृकतया भासमानं व्यवहारमेकसन्तानवर्त्तिनो बहव आत्मानः परस्परवार्त्तानभिज्ञा अपि निष्पादयन्ति तदा भिन्नसन्तानवर्त्तिनः किन्न निष्पादयेयुः। तस्माद्यएवाहमिदं वस्त्वज्ञासिषं सएवाहमिदानीमिच्छामीत्याद्यबाधितप्रत्यभिज्ञाननिर्वाहाय स्थायी आत्माभ्युपेयः। न चासौ विज्ञानरूपः अहंविज्ञानमित्येकत्वानुभवाभावात्। ममेदं विज्ञानमिति संबन्धोह्यनुभूयते। नचायमनुभवो ममात्मेतिवदौपचारिकः बाधकाभावात्। एतेन शरीरेन्द्रियमनसामात्मत्वं प्रत्युक्तम्। तत्रापि संबन्धप्रत्ययस्यानिवार्य्यत्वात् अहमुल्लेखस्यात्राध्यासिकत्वात्। नचायमात्मा सादिः। शरीरोत्पत्तिसमनन्तरमेव सुखदुःखप्राप्तिमालोक्य तद्धेतुभूतयोः पुण्यपापयोः कर्त्ता पूर्व्वमप्यस्तीत्यवगमात्। नचायमनित्यः विनाशानिरूपणात्। न तावत् स्वतोविनाशः निर्हेतुकविनाशस्यातिप्रसङ्गिनः सुगतेतरैरनङ्गीकारात्। नापि परतः। निरवयवस्य विनाशहेतुसंसर्गासंभवात् संभवे वा न विनाशः सिध्येत्। कर्मनिमित्तोह्यन्यस्य संसर्गः स च तत्कर्म्मफलोपभोगायात्मनोऽवस्थितिमेव साधयेन्न विनाशं तस्मादनादेरविनाशिनोऽनन्तशरीरेषु यातायातरूपः संसारः सिद्धः। निर्विकारस्य भोगासंभवाद्विकारस्य क्रियाफलरूपस्याभ्युपगमे क्रियावेशात्मकं कर्त्तृत्वमनिवार्य्यम्। भोक्तृत्वमप्यनुभूयमानं शरीरादिषु विज्ञानपर्य्यन्तेषु अनुपपन्नत्वादुक्तात्मन्येव पर्य्यवस्यति। तथा हि। शरीरं तावत् पञ्चभूतसंघातरूपम् "पञ्चभूतात्मके तस्मिञ्छरीरे पञ्चताङ्गत" इत्यादिशास्त्रात्। यत्तु नैयायिका मन्यन्ते भूलोकवासिनां शरीरं पार्थिवमेव तत्र क्लेदनाद्युपलब्धिर्वस्त्रादाविव भूतान्तरोपष्टम्भादिति। तदसत्। शोषणादिना जलाद्यपगमेऽपि यथा वस्त्रादिस्वरूपस्य नापचयः। तथा क्लेदनपाचनव्यूहनावकाशानामपगमेऽपि शरीरस्यापचयाभावप्रसङ्गात्। यच्च वैशेषिकैरुच्यते पञ्चभूतात्मकत्वे शरीरस्याप्रत्यक्षत्वप्रसङ्गः वाय्वाकाशयोरप्रत्यक्षतया प्रत्यक्षाप्रत्यक्षवृत्तित्वादिति तदप्ययुक्तम्। तथासति सर्वावयविनामप्रत्यक्षत्वापातात्तेषां प्रत्यक्षाप्रत्यक्षावयववृत्तित्वात्। न हि सूक्ष्माः परभागस्थितास्यावयविनोऽवयवाः प्रत्यक्षीकर्त्तुं शक्यन्ते। तस्माद्भूतसंघातः शरीरम्। न च गन्धादिमतां तद्रहितानाञ्च भूतानामेककार्य्याजनकत्वं परस्परविरोधादिति वाच्यम् तथा सति नीलादीनामेकावयविजनकत्वस्यैकचित्ररूपारम्भकत्वस्य चासम्भवप्रसङ्गात्। अनुभवबलादेव तत्र तथा स्वीकारे प्रकृते पि न तद्दण्डवारितम्। तत्र शरीरस्य भोक्तृतां वदन्तो लौकायतिकाः प्रष्टव्याः किं व्यस्तानां भूतानां प्रत्येकं भोक्तृत्वमुत सम-